# संस्कृत-वार्ता:

## 28.07.2024

## सायम् - 06:20

<u>मुख्यवार्ता:</u>

- प्रधानमन्त्री नरेन्द्रमोदी अब्रवीत् यत् प्रशासनम् मादकपदार्थानां विरूध्य कार्याचरणं कुर्वत् अस्ति।
- "मन की बात" इत्याख्ये आकाशवाण्या: कार्यक्रमे प्रधानमन्त्री नरेन्द्र मोदी पेरिस ओलम्पियाड भारतस्य क्रीडकान् प्रोत्साहनं उत्साहवर्धनञ्च कर्तुं जनेभ्य: समाह्वानं विहितवान्।
- दिल्ल्या: पुरातनराजेन्द्रनगरक्षेत्रे शिक्षणसंस्थाया: अधोगृह: वर्षाप्लावेन त्रयाणां छात्राणां मृत्यो: सन्दर्भे दिल्ली आरक्षक: शिक्षण संस्थाया: स्वामिनं समन्वयकं च निग्रहे गृहीतवान्।
- पेरिस नगरे प्रचल्यमाणे ओलंपिक क्रीड़ायाम् कास्यंपदक विजेत्रीं मनु धाकरमालक्ष्य उपराष्ट्रपतिः जगदीप धनखड़ः भूरिशः शुभकामनाः प्रयच्छत्।

******

<u>प्रधानमन्त्री – मन की बात</u>

प्रधानमन्त्री नरेन्द्रमोदी अद्य सहर्षं सगर्वं च व्यक्तमकरोत् यत् असमस्य "चराईदेव मैडाम्" यूनेस्को इत्यस्य विश्व न्यास स्थलस्य सूच्यां समाविष्टम्। अद्य प्रात: आकाशवाण्या: "मन की बात" इति कार्यक्रमे राष्ट्रं सम्बोधयन् प्रधानमन्त्रिणा कथितं यत् अस्यां सूच्यां भारतस्य स्थलमिदं त्रिचत्वारिंशत् तमं भविष्यति सममेव पूर्वोत्तरस्य तावत् प्रथम: सांस्कृतिक विश्व न्यास: भवेदिति। स्थानमिदं किमर्थमतीव महत्वपूर्णम्? इति प्रश्ने सति श्री मोदी अवोचत् यत् "चराइदेव स्थलं" अहोम राजवंशस्य प्रथम: जनपद: बभूव। प्रधानमन्त्रिणा प्रोक्तं यत् मैदान अहोम साम्राज्यस्य दिवङ्गतानां राज्ञां प्रति श्रद्धाया: प्रतीक: वर्तते। श्री मोदिना उदीरितं यत् कोऽपि देश: स्वसंस्कृतस्योपरि गर्वं कृत्वैव प्रगतिपथे गन्तुं शक्नोति। सम्बन्धेऽस्मिन् भारते क्रियमाणानां प्रयत्नानामुपरि प्रकाशं ददन् स: PARI परियोजनाया: उल्लेखं अकरोत्। यस्यार्थ: अस्ति "पब्लिक आर्ट ऑफ इण्डिया"। प्रधानमन्त्री अवादीत् यत् इयं "परी" परियोजना सार्वजनिक कलां लोकप्रियं करिष्यति अपि च कलाकारान् एकं भव्यं मञ्चं च प्रदास्यति। हस्तशिल्पोद्योग विषयेऽपि श्री मोदी हरियाणाया: सार्ध द्विशत महिलानां प्रशंसां अकरोत् यत: ता: रमणीयानां वर्णानां प्रयोगं कृत्वा वस्त्राणामुपरि चित्रकलां कुर्वन्ति। ता: महिला: स्वयमेव

प्रशिक्षणं प्राप्तवत्य:। श्री मोदिना कथितं यत् ये जना: पूर्वं खादी उत्पादानां प्रयोगं न कुर्वन्ति स्म, अद्यत्वे गर्वेण प्रयोगं कुर्वन्ति। तेन कथितं यत् प्रथमं वारं खादी ग्रामोद्योगस्य कुलराजस्व सार्धैकलक्ष रूप्यकाणि अभूत्। अस्मिन् प्रकरणे श्री मोदी पेरिस ऑलम्पिक्स विषयेऽपि प्रोक्तवान् यत् विश्वस्मिन् हि विश्वे भारतीय क्रीडकानां कृते भारतीय ध्वजाहरोहणस्य अयं महान् अवसर: विद्यते। स: जनान् क्रीडकान् प्रोत्साहयितुं तेषां मनोबलं च वर्धयितुं आग्रहं अकरोत्। स: मादक पदार्थानां सेवनस्य विषयेऽपि चिन्तां प्रकटितवान्। सम्प्रति प्रत्येकं परिवार: स्व बालानां विषये चिन्तां कुर्वन्ति। तेनाश्वासितं यत् प्रशासनेन "मानस" इति विशेष: उपक्रमो, विहित: यत् मादक पदार्थानां दुरूपयोगस्य विरूद्धं कार्यं करोति। "मानस" इति अन्तर्जालीयपटलं अद्यैव आरभेत्। जना: एकं-नव-त्रिणी-त्रिणी इति दूरभाषसख्याया: अपि प्रयोगं कर्तं शक्नुवन्ति। अस्मिन्नेव क्रमे श्री मोदी अवादीत् यत् श्व: अशेषे हि विश्वे अन्तारार्ष्ट्रीय व्याघ्रदिवस्य: आचर्यते। अमुना कथिनं यत् व्याघ्रा: भारतीय संस्कृते: अभिन्ना: भागा: सन्ति। वनानां परित: ग्रामेषु जना: व्याघ्रेण सह सामञ्जस्यं कृत्वा जीवितुं जानन्ति। प्रधानमन्त्री अगस्तमासस्य पंचदश दिनाङ्के "हर घर तिरङ्गा" इति कार्यक्रमेऽस्मिन् भागं ग्रहीतुं प्रेक्षकान् आह। "हर घर तिरङ्गा" इत्येष: कार्यक्रम: सम्प्रति अद्वितीयोत्सवेन आमान्यते इति स: अवोचत्।

## दिल्ली-जलाप्लापनम्

दिल्ल्या: पुरातनराजेन्द्रनगरक्षेत्रे शिक्षणसंस्थाया: अधोगृह: वर्षाप्लावेन त्रयाणां छात्राणां मृत्यो: सन्दर्भे दिल्ली आरक्षक: शिक्षण संस्थानाया: स्वामिनं समन्वयकं च निग्रहे गृहीतवान्। केन्द्रीय आरक्षक उपायुक्त: एम हर्षवर्धन: अवदत् यत् दुर्घटनायां द्वौबालकौ एका बालिका च मृता:। संस्थात: जलं निष्काषितुं प्रयत्ना: क्रियन्ते। स: उक्तवान् यत् प्रकरणोऽयं गम्भीरं। दण्डाधिकारिणा अन्वेषणं आरब्धम।

## राष्ट्रपति: द्रौपदीमुर्मु:

राष्ट्रपति: द्रौपदीमुर्मु: विभिन्नेषु राज्येषु नूतन राज्यपालानां नियुक्तिं कृतवती। महाराष्ट्र विधानसभाया: पूर्वाध्यक्षं हरिभाऊ किसनराव वागडें राजस्थानस्य राज्यपालत्वेन नियुक्तवती। त्रिपुराया: पूर्व उपमुख्यमंत्री जिष्णु देव वर्मा तेलङ्गनाया: राज्यपालत्वेन नियुक्त:। राजस्थानस्य पूर्व राज्यसभा सांसद: ओम प्रकाश माथुर: सिक्किमस्य राजयपालत्वेन नियुक्त: पूर्व केन्द्रीय मन्त्री संतोष कुमार गंगवार झारखण्डस्य राजयपालत्वेन नियुक्त:। असमस्य पूर्व लोकसभा सांसद: रामेन डेका छत्तीसगढस्य राजयपालत्वेन नियुक्त:। कर्नाटकस्य पूर्व मंत्री सी एच विजयशंकर: मेघालयस्य राज्यपालत्वेन नियुक्त:। सी. पी. राधाकृष्णन् वर्तमाने झारखंडस्य राज्यपाल:

अस्ति। सम्प्रति च महाराष्ट्रस्य राज्यपालत्वेन नियुक्त: । गुलाब चंद्र कटारिया य: सम्प्रति असमस्य राज्यपाल: अस्ति, पंजाबस्य राज्यपालत्वेन सममेव केन्द्र शासित प्रदेश चंडीगढस्य प्रशासकेन नियुक्त: । लक्ष्मण प्रसाद आचार्य: य: सम्प्रति सिक्कमस्य राजयचपाल: अस्ति, असमस्य राज्यपालत्वेन नियुक्त: । पूर्व आई ए एस अधिकारी के. कैलाशनाथन पुडुचेरी राज्यस्य राज्यपालत्वेन नियुक्त: ।

विदेश मंत्री डॉ. एस जयशंकर:

विदेश मंत्री डॉ. एस जयशंकर: स्व द्विदिवसीय यात्रावधौ अद्य प्रातः टोक्यो नगरे सम्प्राप्तः । जापाने भारतस्य राजदूतः सिबी जॉर्जवर्यः विमान स्थानके विदेश मंत्रिणः एस जयशंकरस्य स्वागतं विहितवान् । अस्मिन् यात्रावधौ एस जयशंकरः जापाने निज समकक्षीयेन सुश्री योको कामिकावावर्येण सह श्वः संजायिष्यमाणे क्वाड इति विदेशमंत्रिणोपवेशने जापान देशं प्रति सम्प्राप्स्यतः। अस्मिन् उपवेशने ,भारत, जापान, अमेरिका ऑस्ट्रेलिया चेत्येषां विदेश मंत्रिणः विगत वर्षे न्यूयार्क नगरे सितंबर मासे सञ्जाते अन्तिमोपवेशने परिचर्चानामालक्ष्य अग्रेसरं भजिष्यन्ति। सममेव भारत-प्रशांत क्षेत्रे विकासमालक्ष्य परिचर्चां करिष्यन्ति। टोक्यो नगरे सम्प्राप्तानन्तरं डॉ. जयशंकरः एडोगावा नगरे फ्रीडम प्लाजाक्षेत्रे महात्मा गांधिनः प्रतिमायाः अनावरणं अपि विहितवान् ।

जयशङ्कर

विदेशमन्त्री डॉ. एस. जयशङ्कर: श्व: क्वाड विदेश मंत्रिणां उपवेशनात् पूर्वं अद्य टोक्यो देशे अमेरिकीय विदेशमन्त्रिणा एंटनी ब्लिंकन इत्यनेन साकं मिलितवान् । उवाभ्यां अन्तरा क्षेत्रीय वैश्विक प्रकरणेषु चर्चा सञ्जाता । एकस्मिन् सामाजिक अन्तर्जालीय पटले डॉ. जयशङ्कर अवादीत् यत् भारत अमेरिका देशयो: द्विपक्षीय लक्ष्यं अविरतं वर्धते । स: क्वाड विदेशयिमंत्रिणां साकं उपवेशने भागं ग्रहीतुं उत्सुक: चास्ति।

## पेरिस ओलंपिक

लक्ष्य भेदिका मनु भाकर: अद्य पेरिस नगरे प्रचाल्यमाणे ग्रीष्मकालिक ओलंपिक क्रीडायां भारताय प्रथमं पदकं विजितवती। असौ अद्य अपराह्ने मेगा चतुष्कोणीय प्रतियोगितायाः द्वितीय दिवसे महिलावर्गे दश मीटरमितस्य एयर पिस्टल स्पर्धायाः अन्तिम चक्रे कांस्य पदकं विजितवती । अमुं उपलब्धिमालक्ष्य एषा भारतस्य प्रथमा महिला लक्ष्यभेदिका सञ्जाता ।

## महिला एशियाकप

श्रीलङ्कादेशस्य डम्बुल्लानगरे प्रचलिष्यमाणे महिला एशियाकप विंशतिः प्रति विंशतिः क्रिकेट् क्रीडा श्रृंखलायाम् अद्य अपराह्ने भारतदलम् श्रीलङ्कादलम् सम्मुखीकरिष्यति। भारतीयदलम् अष्टमवारं शीर्षक्रमं प्राप्तुं प्रयत्नं करिष्यति

।। इति वार्ता: ।।